Author - not-known
Chintamani
चिन्तामणि
Sanskrit-
Paper - Handwritten
Not-known (Very old)
Folios only 4 (1,3,4 & 9)
14.8" x 4.8"
Complete

ज्या

घट इत्यादेरपि प्रसंगात् । अपि च विशिष्टवाचकदंडादिपदेभ्यो धर्म्युपसर्जनतयोपस्थितस्य दंडादेः कथं प्रतियोगित्वेनाभावेऽन्वयः इतरविशेषणत्वेनोपस्थि

१ तस्य निराकांक्षतयान्यत्र विशेषणत्वेनान्वयायोगात् । न चात्र विशिष्टोपस्थापकं पदं विशेषणमात्रपरं । तथापि चैत्रो न दंडी घटो न श्यामरूपमित्यादाव

पि दंडादिसंसर्गाभावप्रतीत्यापत्तेर्दुर्वारत्वात् । एतेन नञ्योभाव लक्षणा कनया किं तु सत्यमीमन्वयबोधसमर्थनं प्रत्युक्तं । एवं च चैत्रो न पचतीत्यादौ ना

४ ना ...स्य पच्छत्या लक्षणयोपस्थितस्य कर्तुरभेदो भासत इत्यस्तु वस्तुतो न पचतीति चैत्रो न दंडी त्रस्येत्यादौ विभक्त्यर्थस्य कृतिसंबंधादेरभावान्वयबोधं न

वौ चासत्याभीनापेक्ष्यते अपेक्ष्यते च प्रातिपदिकार्थस्येति निपुणतरमुपपादयिष्यामः । न च वैधर्म्यपरतया न श्याम इत्यादेः श्यामादिविधर्मेत्यर्थः । वैधर्म्यं च यो

रक्तत्वादिरेव । यथाहुराचार्याः श्यामादिकोविधर्मा न तु पृथग्गीत्यपि वद्यतिकृतं पर्क्तावितेन भासंबंधत्वेनोति । निरूपितत्वमेव तु कस्येति । इत्थं च अननुगत... मात्रे अपि

नं यच्चानुगमितं इदं तु स्वत्वावस्यते । एते अन्योन्याभावत्वं तु नाभावगर्भे । नादृश्येति । ननु किं द्वित्वादिकं प्रति योगितावच्छेदकमेव न भवतीति किं वा भवत्येव प्र त

रं तु कृत्यानामेव स्वसमानाधिकरण तत्तद्धर्मावच्छिन्नप्रतियोगिताका नाम भावानां लघुत्वादित्याभिप्राय न नाद्यः । एकैकाभावप्रतीतितो द्वौ न स्त इति प्र ४ व

तीतिविलक्षणत्वात् शब्दादिना द्वौ न स्त इति ... नियमेऽप्येकैकाभाव संशमाच्च । विषमानुगमं विना अनुगताकारप्रत्ययापायमात् । न चाभावस्य द्वित्वा

धिकरणप्रतियोगिकत्वमात्रं । द्वित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिकत्वं वा । द्वयं नास्तीति प्रतीतेर्विषमः । नाद्यः द्वित्वाधिकरणव्यक्तिविशेषविर

हेऽपि तद्घटोविद्योन्य शालिनि नाद्ये द्वौ न स्त इति प्रत्ययात् । द्वित्वसामानाधिकरण्यग्रहणेऽपि प्रतीतेरनुगताकारत्वाच्च अत एव न तादृशप्रतीतेर्घट

न्नभेदज्ञानं कपिसंयोगिभेदवत्त्वच्छेदस्याव्याप्यवृत्तित्वेनाविरोधात् नापि मूर्त्तावच्छेदेन तज्ज्ञानमप्रसिद्धेः तद्धर्मावच्छिन्नभेदस्य तद्धर्ममात्रपर्यवसिततया कपि
संयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूर्त्तवृत्तित्वे विरोधाच्च नहि घटभिन्नभेदो घटत्वादतिरिच्यते अतस्य कृत्पघटत्वेनैवोपपत्तौ अतिरिक्तकल्प
नायां मानाभावात् अन्यथा सर्वत्राभावस्याभावो अतिरिक्त एव कल्प्येत अत एवात्यन्ताभावप्रतियोगिनोरन्योन्याभावप्रतियोगितावच्छेदकयोः सा
मान्यत एव कृत्पो विरोधः तेन कपिसंयोगाबावत्यपि वृक्षे मूलेन कपिसंयोग्यभूदिति प्रतीतेरन्यथानुपपत्त्या तावद्धर्मयोः संसर्गोच्यतां नह्येषा प्रतीतिः कपिसं
योगिभेदविषयत्वेनोपपादयितुं शक्या नियमतः संयोगवत्त्वेन प्रतियोगिनो अनुपस्थितेः प्रतियोगिकोटौ तद्वृक्षे खाच्छ्वमूलेन कपिसंयोगी इति प्रती
तेस्तु शिखी विनष्ट इतिवत् समानविशेषणस्याभावमात्रविषयत्वेनोपपन्नत्वात् भ्रान्तिमयोरपि इति परास्तं अन्योन्याभावान्तरस्य प्रतियोगितावच्छेदकान्तरसमानाधिकरण
तया अन्योन्याभावप्रतियोगितावच्छेदकासामानाधिकरण्यपर्यवसायिनो विरोधस्य स्वत्वघटितत्वेन विशेष एव विश्रामात् अत्यन्ताभावप्रतियोगिनो रिवान्योन्या
भावप्रतियोगितावच्छेदकयोरबाधितसामानाधिकरण्यानुभवेन प्रतिविरुद्धतया तथाविधविरोधकल्पनस्यानवकाशाच्च किंच शिखी विनष्ट इति प्रतीतौ विशिष्टध्वंसो
ऽपि स्वीकार्य विशेष्येतरवाद्यादास्तां विशेषणध्वंसानभ्युपगमानां संयोगीति प्रतीतौ विशिष्टभेदमवगाहमानायाः कथं विशेषणसंसर्गाभावविषयत्वेनोपपत्तिः नखलु
सइसृणोपि बाधकेऽपि रजतमिति प्रतीतौ रंगत्वावच्छिन्नं व्यवस्थापयितुं शक्यते नच विशेषणभेद एव तुल्याविषमः अग्रेपि न कपिसंयोगीति प्रतीत्यापत्तेः
२८ युज्यते चान्योन्याभावव्याप्यवृत्तिः कथमन्यथा पक्वतादशायां घटः श्यामो दण्डादिविनाशसमये चैत्रादौ नायं दण्डवानित्यादियो व्यवहारः नच तत्र वि
शेषणसंसर्गाभाव एव प्रतीयते अनुयोगिनि सत्त्वधर्मं विना तदनुपपत्तेः नखलु भूतले न घट इत्यादीनि वाक्यानि कदाचिदपि घटसंसर्गाभावं बोधयन्ति तथात्वे वा घटो न

वि॥ व्या॥ वृत्तित्वसामान्यकत्वं। स्वाविशिष्टाधिकरणवृत्तियावत्साध्यसमानाधिकरणकत्वमिति तत्फलितार्थः। सत्तात्वविशिष्टसत्ताधिकरणकर्मादिवृत्तित्वस्य

४ साध्यसमानाधिकरणकर्मत्वादौ सत्वान्नातिप्रसंगः। कर्मादिवृत्त्यत्वविशिष्टसत्ताया अध्यासजनकर्मादिरितिनाप्रसंगः एवं च मेयत्वादेरपि केवलान्व

यिसाध्यानाधिकरण्यावच्छेदकत्वोपपत्तिः। प्रत्युवृत्तिमत्वादिकमेव तत्र व्याप्तिः। नहृद्वस्तु मेयत्वादिनेति तन्नव्याप्तिविरहिवृत्तितयाग्रह्यमा

णेन रूपेण व्याप्तिग्रहासंभवात्। अन्यथा अतिप्रसंगात्। साध्यतावच्छेदकसंबंधेन साध्याधिकरणे येन येन संबंधेनावर्तमानत्वं हेतुतावच्छेदकसं

बंधेन हेत्वधिकरणेऽपि तेन तेन तद्वत्त्वं बोध्यं। नीलधूमत्वादेर्वारणीयत्वेऽपि स्वसमानाधिकरणतादृशधर्मांतराघटितत्वेन विशेषणीयं। सामा

नाधिकरण्योपादानाद्गुणप्रागभावत्वादिप्रसंगः। तद्घटितत्वं च तदविषयकप्रतीतिविषयत्वं। स्वरूपसंबंधविशेषएवावच्छेदकत्वं अतएवनह्य

तिप्रसक्तधर्मोऽवच्छेदकमित्यादि ~~[illegible]~~ कमपि संगच्छते। अन्यथा अतिप्रसक्ते अनतिप्रसक्तत्वस्याप्रसक्तत्वेन तन्निराकरणायोगात्। विरुद्धयोर्भावा

भावयोरधिकरणे एकस्मिन्नेकेन संबंधेन वृत्तिर्विरुध्यते अतस्तत्रावच्छेदकभेदापेक्षा अतएव व्यभिचारिणि साध्यतदभावसामानाधिकरण्ययो

र्विरुद्धयोरुपपादनायोपाधितदभावावच्छेदकावगम्यते। न्यायाचार्यैः। सत्तात्वं तु गुणाद्यभावस्येव गुणस्यापि न सामानाधिकरण्यावच्छेदकं ४

विरोधात्। अव्याप्यवृत्तेश्च कपिसंयोगादेरधिकरणे वृक्षादौ तदभावस्य संयोगे न च वन्हेरधिकरणे महानसादौ समवायावच्छिन्नप्रतियोगिताक

तदभावस्य सत्वेनाविरुद्धत्वात्। वन्हिमति च संयोगेन वर्तमानस्याधूमादेर्वन्ह्यभाववति स्वावयवे संयोगेनावर्तमानत्वाच्च। तद्वत्त्वलघुमत्वादेर्न

साध्यसामानाधिकरण्यावच्छेदकत्व

वैशिष्ट्याभावविशिष्टाधिकरणवृत्तित्वविशिष्ट

नैव तद्धर्मावच्छिन्नसाध्यसामानाधिकरण्य

उभयवद्भौपादानमनतिप्रयोजनकमिति वाच्यं भावतां तद्व्यक्तिभिन्नवद्वीनामेकाधिकरण्यस्याप्रसिद्धेः॥ नचावच्छेदकं समपहाय पाप्रतियोगि
नः यावत्त्वेन विशेष्यतां। साध्यव्यापकरूपकस्यापि रूपांतरेण साध्यसमानाधिकरणात्यंताभावप्रतियोगित्वस्योपदर्शितत्वादित्याहुः। साध्यसमाना
धिकरणात्यंताभावप्रतियोगितानवच्छेदको यावान् तियत्समानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वं नास्ति तत्त्वमिति तु नव्याः॥ अवच्छिन्नं सा मर्थ,
मानाधिकरण्यं सामानाधिकरण्यावच्छेदकरूपं वा व्याप्तिः। इत्थं च धूमत्वद्रव्यत्वादेर्व्याप्यतावच्छेदकत्वं दंडत्वादेर्नियतपूर्ववर्तितावच्छेद
कधर्मात्मककारणतावच्छेदकत्ववदुपपद्यते। अनुपाहितानुपहितत्वेन द्वा संबंधिनीम्। तच्चाद्यमभिप्रेत्याहुः यत्संबंधिनेति। सासंबंधिता सामानाधिकरण्य
रूपा जनकत्वादिरूपा तत्र। अत्र च विशिष्टसत्तायां स्वावच्छिन्नगुणादेः सामानाधिकरण्याधिकरणसत्त्वादेः कर्मादेः परामर्शाद्गुणाद्यनुमितापत्तेः
साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शजन्यत्वपक्षे साध्यनिर्णयात् प्राग् संशयीत्वन्न्यायेन द्वितीयम्॥ उभयमात्रोक्ते धूमवत्त्वादौ विशेष्य
संदेहेऽपि सामान्यतोऽवच्छेदकरूपवत्त्वनिर्णयः संभवत्येवेति हृदयं। अत्रावच्छेदकत्वं नाम न्यूनवृत्तित्वं अन्यूनानतिरिक्तवृत्तित्वं वा वह्न्यादौ सा द
ध्ये मेयत्वादावतिप्रसंगात् धूमत्वादावप्रसंगाच्च किं त्वनतिरिक्तवृत्तित्वं तच्च यद्यपि न तदभाववद्वृत्तित्वं गुणवान् सत्त्वादित्यत्र सत्त्वेऽतिप्र-
संगात् नचकर्मादिवृत्तित्वावच्छेदेन गुणसामानाधिकरण्याभाववत्सत्तापि वर्तमानत्वान्नतथा तथा सति विशिष्टसत्त्वेऽप्यगुपदर्शितादि साच
धूमत्वादावव्याप्तिप्रसंगात् तथापि अतिरिक्तो यद्धर्मविशिष्टहेत्वधिकरणवृत्तित्वं न वर्तते। तत्त्वं साध्यसमानाधिकरणवृत्ति विशिष्टाधिकरण x स्व

विं॥श्री॥
२

घानेकव्यक्तिकस्यसम्भवतोऽप्युपाध्येर्द्धर्मान्तरविशिष्टत्वादिना ऽभावेऽनवस्थेव साध्यसमानाधिकरण इत्यवच्छेदकानुसरणं। साधनसमा
नाधिकरणात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकाभावं तोऽभावावच्छेदकधर्मावच्छिन्नसमानाधिकरणः तद्धर्मवत्वसामाना
धिकरण्यमित्यर्थः। अत्राप्यत्राभावाभिलाप्याः तेन इदं जलं स्नेहवत्वादित्यादौ स्नेहवत्वसमानाधिकरणात्यंताभावप्रतियोगि
तावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावानां सकलरूपाणां जलत्वसामानाधिकरण्यविरहेपि नाव्याप्तिः। घट
ध्वंसो ध्वंसत्वादित्यादौ च घटध्वंसत्वादेस्तत्प्रकारकप्रमाविशेष्यत्वादेर्वाभावाभाववृत्तिरतिरिक्तोऽभावस्तादृशेन घटध्वंसत्वादिसमा
नाधिकरण इति नातिव्याप्तिरित्यपि वदंति। यावदिति स्वंव्यभिचारिणामेषां तेषां यावतां व्यभिचारिणा साध्येन सामानाधिकरण्यमित्यर्थः। यावदिति करण्य
यत्पदं साध्यत्वाभिमतपरं सोपाधिवारणाय यावदिति नु सप्तमीकस्य द्वितीयांत्यंताभावार्थे विशेषणं तथाच साध्यव्यापकतावच्छे
दकावच्छिन्नप्रतियोगिताकात्यंताभावत्वव्यापकस्वसामानाधिकरण्यसामान्याभावकत्वमर्थः। केवलान्वयिस्थले त्वाकाशादि २
रेव तथाविधोऽभावः प्रसिद्ध इति सम्प्रदायः। केचित्तु तादृशयावदभावशून्यत्वं यदधिकरणतया व्यापकं तत्वमर्थः। नच तादृशप्र
तियोगितानवच्छेदकवन्मात्रवृत्त्यभावत्वेच्छिन्नविशिष्टयावत्तादृशाश्रयत्वं यदधिकरणतया व्यापकं तत्वमित्यर्थकत्वादेव सामंजस्यो

त्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वं अन्यतरत्वानुगमेऽपि घटपटौ न स्त इत्यनुमतप्रत्ययसाक्ष्यम्। न च परम्परासंबंधेन तादृश
द्वित्वसामान्याभाव एव द्वौ न स्त इति प्रतीतेर्विषयः। द्वित्वाधिकरणयोरेव प्रतियोगित्वेऽङ्गीकृते स्यात् द्वित्वादेर्घटादिवृत्तित्वानुपपत्तिर्वाऽपि अन्यतमस्य
नापि घटपटौ न स्त इत्यादिप्रत्ययसाक्ष्यम्। अत एवैकैकविशिष्टापराभावोऽपि न तदालम्बनं। विरुद्धयोरपि जलत्वपृथिवीत्वयोर्द्वित्वे नाभावप्रत्यया
दित्युक्तत्वाच्च। नान्त्यः तत्रापि साध्यतद्भेदोस्तादृशाभावप्रतियोगित्वानपायात्। अन्यतरेणाभावान्तरमेकैकघटत्वजायमानापायात्किंचिद्घट
द्वयवति चानुत्पाद्यमानाया घटौ न स्त इति प्रतीतेरुपपादयितुमशक्यत्वादित्यत आह अन्यपममेवेति। उभयत्वमेव प्रतियोगितावच्छे
दकं न तु साध्यतावच्छेदकं। साध्यवत्त्वे त्वर्थः। अभूयमाणावच्छेदकत्वेऽपि लक्षणे तद्वैयर्थ्यविवक्षितमिति भावः। तच्चेति स्वं साधनत्वेऽपि ना
मतं। तत्त्वाच साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकायावंतो धर्मास्तद्धर्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगिता
मिावच्छेदकः तद्धर्मावच्छिन्नसामानाधिकरण्यमित्यर्थः। एतेन सर्वत्र तादृशैर्यावद्भिरवच्छिन्नस्य तादृशावच्छिन्नयावत्प्रतियोगिकस्य चातिप्रसंगका ज्
त्माभावत्वावच्छिन्नप्रतियोगिताकादतिरिक्तस्याभावस्याप्रसिद्धिः। तादृशावच्छिन्नप्रतियोगिताकानां यावदभावानामधिकरणस्यप्रा
स प्रसत्त्वाद्रूपादिसाध्यकपृथिवीत्वादावव्याप्तिश्च। क्वापि रूपादिव्यक्तौ तादृशयावदभावसामानाधिकरण्यासंभवादिति प्रत्युक्तं। सर्वत्र सो
×ग्ति

वि॥ चिं॥ पर्यंउपाधेः साधनाव्यापकत्वात् तायद्धायत्संबंधितावच्छेदकरूपवत्वंयस्यतस्यसाव्याप्तिः॥ तथाहि धूमस्यवन्हिसंबंधित्वे धूमत्वमवच्छेदकं धूममात्रस्यवन्हिसंबंधित्वा
१ लै द्वन्हेस्तुधूमासंबंधित्ववन्हित्वमनवच्छेदकं धूमसंबंधिनिमतत्वात् नह्यतिप्रसक्तमवच्छेदकं संयोगादौ तथात्वादर्शनात् किंतु वन्ह्याद्रेंधनप्रभववन्हित्वंधू
मसंबंधितावच्छेदकं तादृशंचव्याप्यमेव। अथवा यावत्सामानाधिकरण्यावच्छेदकावच्छिन्नंयस्यस्वरूपंतत्तस्यव्याप्यंवन्हिसामानाधिकरण्यंहि
धूमेधूमत्वेनावच्छेद्यते सोपाधौ त्वउपाधिना॥ अतएवसाधनतावच्छेदकभिन्नेनयेनसाधनताभिमतेसाध्यसंबंधोऽवच्छिद्यतेसएवतत्रसाध
चं नेविशेषणमुपाधिरितिवदंति। अतएवचसाध्यसाधनाव्यापकत्वेसतिसाधनावच्छिन्नसाध्यव्यापकत्वंलक्षणंधूमंव्यभिचारिणंसाधनेएकत्रसा
ध्यतदभावयोर्विरोधेनअनवच्छेदकत्वंविनातदुभयसंबंधा।

श्रीगणेशाय नमः ॥ अथ चिंतामणिः ॥ यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यंताभावाप्रतियोगिना सामानाधिकरण्यं यत्समानाधिकरणान्योन्याभावप्रतियो

गियद्वन्न भवति तेन समं तस्य सामानाधिकरण्यं वा ॥ स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्वत्त्वं वा ॥ अन्यवृत्तिवह्निद्वयोरन्यवृत्तिधूमवान्निष्ठात्यंता

भावान्योन्याभावप्रतियोगित्वात् ॥ व्यधिकरणवह्निधूमयोर्न व्याप्तिः ॥ किंतु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना ॥ न चैवं धूममात्रेण व्याप्तिरिति वाच्यं

सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् ॥ धूमसंबंधिवह्निस्तद्व्याप्य एवमुभयपदुत्पन्नयोश्च व्याप्तिरेवं कर्मणि च संयोगाभावः प्रतियोग्यसमानाधि

करणः ॥ यद्वा प्रतियोगिवैय्यधिकरण्यावच्छेदकावच्छिन्नत्वमत्यंताभावविशेषणं कर्मणि च संयोगाभावस्य प्रतियोगिवैय्यधिकरण्यावच्छेदकावच्छिन्नत्वमेव ॥ न

चान्योन्याभावस्याव्याप्यवृत्तित्वं भेदस्याबाधितप्रत्यभिज्ञानात् ॥ व्याप्यव्यापकभावज्ञानेपि वस्तुसंचारेणाज्ञायमानस्य संबंधत्वेनैव भावस्य षष्ठ्यर्थत्वं ॥ न चै

७ वमननुगमो दोषायकस्य कान्याप्तिरित्यन्नमतस्यैव लक्ष्यत्वात् ॥ अथ धूमवति वह्निद्वयोर्नस्तद्धूमवान्न वह्निद्वयेन भवतीति प्रतीतेर्भेदः सज्यवृत्तिप्रतियोगिको

वह्निर्वह्निमतोरत्यंतान्योन्याभावौ धूमवति विद्येते इति कथं तेल्लक्षणेद्वितीये न तादृशाभाववान् व्युपगमात् अभ्युपगमे वा न च तदुभयप्रतियोगिवह्निर्वह्निमंतौ ॥ अथ वा ।

नौपाधिकत्वं व्याप्तिः ॥ तच्च यावत्स्वसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न तत्प्रतियोगिकात्यंताभावसमानाधिकरणं यत् तेन समं सामानाधिकर

ण्यं न ह्येवं सोपाधिः ॥ तत्र साधनसमानाधिकरणात्यंताभावप्रतियोगि न आर्द्रेंधनवत्वादेरुपाधेर्योत्यंताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात् उपा

धेः साध्यव्यापकत्वात् ॥ एतदेव यावत् व्यभिचारि व्यभिचारि साध्यसामानाधिकरण्यमनौपाधिकत्वमीयते ॥ यद्वा यावत्स्वसमानाधिकरणात्यंताभावप्रतियोगिप्रतियो

गिकात्यंताभावासामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वं सोपाधौ तु साध्यवन्निष्ठात्यंताभावाप्रतियोगिन उपाधेर्योत्यंताभावस्तेन समं हेतोः सामानाधिकर ।

विनष्ट
त ४
स १
नै
×